परा पूजा

अखण्डे सच्चिदानन्दे निर्विकल्पैकरूपिणि

स्थितेऽद्वितीयभावेऽस्मिन् कथं पूजा विधीयते ॥ ।१

पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।

स्वच्छस्य पाद्यमर्घ्यं च शुद्धयाचमनं कुतः ॥२

निर्मलस्य कुतस्स्नानं वस्त्रं विश्वोदरस्य च ।

अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ॥ ।३

निर्लेपस्य कुतो गन्धः पुष्पं निर्वासनस्य च

निर्विशेषस्य का भूषा कोऽलङ्कारो निराकृतेः ॥४

निरञ्जनस्य किं धूपैर्दीपैर्वा सर्वसाक्षिणः ।

निजानन्दकतृप्तस्य नैवेद्यं किं भवेदिह ॥ ५

विश्वानन्दयितुस्तस्य किं ताम्बूलं प्रकल्प्यते ।

स्वयंप्रकाशचिद्रूपो योऽसावर्कादिभासकः ॥६

प्रदक्षिणा ह्यनन्तस्य ह्यद्वयस्य कुतो नतिः

वेदवाक्यैरवेद्यस्य कुतस्स्तोत्रं विधीयते ॥७

स्वयंप्रकाशमानस्य कुतो नीराजनं विभोः ।

अन्तर्बहिश्च पूर्णस्य कथम् उद्वासनं भवेत् ॥८

एवमेव परा पूजा सर्वावस्थासु सर्वदा ।

एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमैः ॥९

आत्मा त्वं गिरिजा मतिः सहचराः प्राणाश्शरीरं गृहम् ।

पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः

सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो

यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥१०

akhaNDe saccidaanande nirvikalpaikaruupiNi
sthite.advitiiyabhaave.asmin kathaM puujaa vidhiiyate...1
puurNasyaavaahanaM kutra sarvaadhaarasya caasanam.
svacchhasya paadyamarghyaM ca shuddhayaacamanaM kutaH..2
nirmalasya kutassnaanaM vastraM vishvodarasya ca.
agotrasya tvavarNasya kutastasyopaviitakam...3
nirlepasya kuto gandhaH puSpaM nirvaasanasya ca
nirvisheSasya kaa bhuuSaa ko.alaN^kaaro niraakRRiteH..4
niraJNjanasya kiM dhuupairdiipairvaa sarvasaakSiNaH.
nijaanandakatRRiptasya naivedyaM kiM bhavediha.. 5
vishvaanandayitustasya kiM taambuulaM prakalpyate.
svayaMprakaashacidruupo yo.asaavarkaadibhaasakaH..6
pradakSiNaa hyanantasya hyadvayasya kuto natiH
vedavaakyairavedyasya kutasstotraM vidhiiyate..7
svayaMprakaashamaanasya kuto niiraajanaM vibhoH.
antarbahishca puurNasya katham udvaasanaM bhavet..8
evameva paraa puujaa sarvaavasthaasu sarvadaa.
ekabuddhyaa tu deveshe vidheyaa brahmavittamaiH..9
aatmaa tvaM girijaa matiH sahacaraaH praaNaashshariiraM gRRiham.
puujaa te viSayopabhogaracanaa nidraa samaadhisthitiH
saJNcaaraH padayoH pradakSiNavidhiH stotraaNi sarvaa giro
yadyatkarma karomi tattadakhilaM shambho tavaaraadhanam..10